किं बहुना । परस्परं वैधम् उत्पन्नम् । स च राज्ञः शरणं गतो
ऽब्रवीत । देव । एते पक्षिण एवं वदन्ति । यद् अस्माकं राजा
किं करियति । न कस्याप्य् आवासं दद्मः । मया चोक्तम् । न
शोभनं युष्माभिर् अभिहितम् । अहं गत्वा राज्ञे निवेदयिष्यामि ।
एवं स्थिते देवः प्रमाणम् । ततो राजा भृत्यान अब्रवीत् । भोः ।
गच्छत । सर्वान पक्षिणो गतासून कृत्वा शीघ्रम आनयत । राजा
देशानन्तरम् एव प्रचेलुस ते । अथ लगुडहस्तान राजपुरुषान
दृष्ट्वा तत्रैकेन पक्षिण वृद्धेनोक्तम् । भोः स्वजनाः । न शोभनम
आपतितम् । ततः सर्वैर् एकमतीभूय शीघ्रम् उत्पतितव्यम् । तैश् ·
च तथानुष्ठितम् ॥

अतो ऽहं ब्रवीमि । भूतान यो नानुगृह्णाति । इत्य् उक्त्वा पुनर
अपि ब्राह्मणः प्रत्यूषे क्षीरं गृहीत्वा तत्र गत्वा सर्पप्रत्यायनार्थ 12
निवेदितवान् । यन मदीयपुत्रः स्वबुद्ध्या पञ्चत्वम् उपगतः ।
ततो भुजंगो ऽब्रवीत् । चितिकां दीपितां पश्य । इत्यादि ॥

तद् अस्मिन् हते ऽयत्नाद् एव राज्यम् अकण्टकं भवतो भवति । 15
तस्यैतद् वचनं श्रुत्वा क्रूराक्षं पप्रच्छ । भद्र । त्वं तु किं मन्यसे । सो ऽब्रवीत् । देव ।
निर्दयम् एतत् । यद् अनेनाभिहितम् । यत्कारणम् । शरणागतो न वध्यते । सुष्ठु खलु
इदम आख्यानम् । 18

श्रूयते हि कपोतेन । शत्रुः शरणम आगतः ।
पूजितश् च यथान्यायं । स्वैश् च मांसैर् निमन्त्रितः ॥ १२० ॥

अरिमर्दनो ऽब्रवीत् । कथम् एतत् । क्रूराक्षः कथयति । 21

॥ कथा ॥

कश्चित् * क्षुद्रसमाचारः । प्राणिनां कालसंमितः ।
विचचार महारण्ये । घोरः शकुनिलुब्धकः ॥१२१ ॥
24